V. KRISHNAMACHARYA

THE *KARMĀKARMAVIVEKA* OF UPA
BRAHMAYOGIN

AMONG the followers of Śaṃkara's Advaita p
there exist two different views regarding the su
of *avidyā* (nescience) which is the strong ba
of the Māyāvāda of the school. The Vivara
thāna (the *Vivaraṇa* school of Prakāśātman)
view that Brahman is the basis of *avidyā*. On
hand the Bhāmatī Prasthāna (the *Bhāmatī*
Vācaspati) holds the view that the individual
the basis of *avidyā*. The principle of the latte
was borrowed from the *Brahmasiddhi* of Maṇḍa
of whom Vācaspati is said to have been a
follower.

In the *Karmākarmaviveka*, the author poin
way to reconcile the principles of both schools.
is classified into two kinds, *Mūlāvidyā* and *Tūlā*
former residing in Brahman and the latter in ind
souls. In this respect the author follows the *Si*
leśasaṃgraha of Appayadīkṣita. *Mūlāvidyā* is so
because it is the primal cause of the phenomenal
and is not easily destructible. The other vari
called *Tūlāvidyā* because it is easily destructible,
heap of cotton (*tūla* = cotton). The *Mūlāvidyā*
cribed as *samaṣṭi* (aggregate) because it abides
tively in a single object, Brahman. The *Tūlā*

... as *vyaṣṭi* (individual) because it abides ... in many objects, namely individual selves. ... main purpose of the work is to describe the ... by the twofold *avidyā* in bringing about ... *karman-s* (actions), *āgāmin* (future), *prārabdha* ... and *saṃcita* (past in accumulation), and to ... from them Brahman and individual selves as ... (actionless). Each of these *avidyā-s* has a ... aspect, namely Turya, Bīja, Sūkṣma and ... which it generates *karman-s* (actions).

... author Upaniṣadbrahmayogin[1] alias Rāma-...rayogin was the pupil of Vāsudevendrayogin. ... popularly known as Upaniṣadbrahmayogin ... wrote regular commentaries on all the 108 ...-s. He lived about A.D. 1750.

... edition is based on the following MSS.:

A. Adyar Library MS. Palmleaf. Grantha. No. 74023.

B. Adyar Library MS. Palmleaf. Grantha. No. 75590.

C. Madras Govt. Oriental MSS. Library MS. Palmleaf. Grantha. No. D 4572.

[1] See Dr. V. Raghavan, 'Upanishad Brahma Yogin, His Life ... Works', *Journal of the Music Academy*, Madras, vol. 27, 113-29.

कर्माकर्मविवेकः

उपनिषद्ब्रह्मयोगिकृतः

नीरन्ध्रनीरसाविद्याकर्मारण्यदवानलम् ।
आत्मारामं हरिं वन्दे त्रिपान्नारायणाभिधम् ॥ १ ॥
नत्वा गुरुमविद्योत्थकर्माब्धिं तर्तुमिच्छताम् ।
कर्माकर्मविवेकाख्यनौकेयं क्रियते दृढा ॥ २ ॥
अकर्मप्रत्यगद्वैतत्रिपान्नारायणात्मनि ।
कर्मत्रयात्मिकाविद्या कल्पिता व्योम्नि नैल्यवत् ॥ ३ ॥
भिद्यते सा पुनर्द्वेधा समष्टिव्यष्टिरूपतः ।
मूलाविद्या समष्ट्याख्या व्यष्टिस्तूलाभिधां[1] गता ॥ ४ ॥
तुरीयबीजसूक्ष्मादिस्वविभक्तांशभेदतः ।
चतुर्धा भिद्यतेऽविद्याद्वयं चापि स्वभावतः ॥ ५ ॥
अविद्याद्वयतुर्यांशः समः स्याद् गुणसाम्यतः ।
भिद्यते गुणवैषम्याद्भागत्रयमविद्ययोः ॥ ६ ॥
मूलाविद्याबीजभागः [2]शुद्धसात्त्विकसात्त्विकः ।
तूलाविद्यामोहबीजागामिकर्मालिकारणम् ॥ ७ ॥
मूलाविद्यासूक्ष्मभागः शुद्धसत्त्वरजोमयः ।
तूलाविद्यासूक्ष्मभागकर्मसंचयकारणम् ॥ ८ ॥
मूलाविद्यास्थूलभागः शुद्धसत्त्वतमोमयः ।
तूलाविद्यास्थविष्ठांशारब्धकर्मालिकारणम् ॥ ९ ॥

[1] भिदां A. [2] शुद्धसत्त्वादि B.

मूलाविद्यातुर्यभागो निवृत्तिज्ञानलक्षणः ।
[illegible] भागत्रयं तस्याः प्रवृत्त्यज्ञानलक्षणम् ॥ १० ॥
मूलाविद्यासमारोपाधिष्ठानं ब्रह्म सर्वगम् ।
[illegible] स्वीकृत्य सहसोदासीनासङ्गभावतः ॥ ११ ॥
मूलाविद्यातुर्यबीजसूक्ष्मस्थूलांशयोगतः ।
[illegible]सूत्रवैराजकलनामात्तवत् स्थितम् ॥ १२ ॥
तूलाविद्यासमारोपाधिष्ठानं प्रत्यगद्वयम् ।
[illegible]सङ्गमपि भ्रान्त्या तया मोहितवत् स्वयम् ॥ १३ ॥
[illegible]विद्यातुर्यबीजसूक्ष्मस्थूलांशयोगतः ।
[illegible]प्राज्ञस्वप्नपतिव्यावहारिकवत् स्थितम् ॥ १४ ॥
तूलाविद्यातुर्यभागो गुणवैषम्यवर्जितः ।
[illegible]विद्याकर्मसंभूतभाविमोहनिवारकः ॥ १५ ॥
[illegible]प्रत्यगद्वैतब्रह्म तत्तुर्यपादगम् ।
[illegible]नीयमिदागामिसंचितारब्धसंततेः ॥ १६ ॥
[illegible]भावौ काशयत्सत्प्रत्यगात्मस्वरूपतः ।
[illegible] व्यभिचरत्सर्वसाक्षिवत्प्रतिभाति तत् ॥ १७ ॥
तूलाविद्याबीजभागो मिश्रसत्त्वादिसात्त्विकः ।
आगामिकर्मरूपेण स वै परिणतिं गतः ॥ १८ ॥
स्वाज्ञानमोहावरणदेहोऽयं तेन निर्मितः ।
प्रत्यगात्मापि तेनैव संतप्तायसपिण्डवत् ॥ १९ ॥
भ्रान्तिजं प्राप्य तादात्म्यं संमोहित इव स्वयम् ।
[illegible]न्यनर्थनिदानार्हप्राज्ञवत् प्रतिभाति सः ॥ २० ॥

[1] तूल A. B.

तूलाविद्यासूक्ष्मभागो मिश्रसत्त्वादिराजसः ।
कर्मसंचयरूपेण स वै परिणतिं गतः ॥ २१ ॥

सुखादिसाधनो लिङ्गदेहोऽयं तेन निर्मितः ।
पारमार्थिकजीवोऽपि तेन संतप्तलोहवत् ॥ २२ ॥

सहजं प्राप्य तादात्म्यमभेद्यं सहजत्वतः ।
व्यावहारिकताहेतुप्रातिभासिकवत्स्थितः ॥ २३ ॥

तूलाविद्यास्थूलभागो मिश्रसत्त्वादितामसः ।
प्रारब्धकर्मरूपेण स वै परिणतिं गतः ॥ २४ ॥

सुखदुःखालयस्थूलदेहोऽयं तेन निर्मितः ।
प्रातिभासिकजीवोऽपि तेन संतप्तलोहवत् ॥ २५ ॥

कर्मजं प्राप्य तादात्म्यं कोटिजन्मालिकारणम् ।
सर्वानर्थधुरावाहो व्यावहारिकवत्स्थितः ॥ २६ ॥

व्यावहारिकजीवोऽसौ प्रारब्धफलभुक् स्वयम् ।
आगामिपुण्यपापाभ्यां जन्मसंचयपूरकः ॥ २७ ॥

नन्वकर्मप्रत्यगैक्यब्रह्म कर्मसमन्वयात् ।
प्राज्ञस्वप्नेड्विश्व इति त्रिधा भेदं गतं यदि ॥ २८ ॥

आगामिसंचितारब्धकर्माणीह यथाक्रमम् ।
प्राज्ञादयः प्रकुर्वन्तु न विश्व इति चेन्न तत् ॥ २९ ॥

आगामिकर्माधिष्ठानप्राज्ञस्य द्वैतशून्यतः ।
द्वैतसत्त्वेऽपीतरस्य प्रातिभासिकरूपतः ॥ ३० ॥

आगामिसंचितादीनां कर्तृत्वं नानयोर्भवेत् ।
व्यावहारिकजीवत्वादस्य तत्कर्तृता भवेत् ॥ ३१ ॥

मत्वा देहादिकं सत्यं जित्वा राज्यादिकं बहु ।
कोशागारं यथा राजा भोगार्थी पूरयेद्धनैः ॥ ३२ ॥
चिदाभासस्तथागामिजन्महेतुशुभाशुभैः ।
कर्मभिः पूरयेज्जन्मकोशं जन्मादिवाञ्छया ॥ ३३ ॥
प्रारब्धवेगेन कुर्वन्नुच्चावचक्रियाम् ।
स्वजन्यकोशकृत्कोशे कोशकृज्जडजन्तुवत् ॥ ३४ ॥
तं [1]भित्त्वान्यत्र गमनानीशोऽभूद्व्यावहारिकः ।
अनेकजन्मसुकृतनित्यनैमित्तिकादिभिः ॥ ३५ ॥
शुद्धान्तःकरणो भूत्वा निष्कामेण हरिं भजन् ।
संन्यस्य सद्गुरुं प्राप्य तन्मुखात् प्रणवादिकम् ॥ ३६ ॥
गृहीत्वा नियतो भूत्वा वेदान्तश्रवणादिना[2] ।
देहत्रयेण तादात्म्यत्रये नष्टे प्रबोधतः ॥ ३७ ॥
व्यावहारिकजीवत्वं त्यक्त्वा तैजसतामपि ।
प्राज्ञो भूत्वा स्वस्वरूपं भजति व्यावहारिकः ॥ ३८ ॥
तस्मात् सर्वस्य कर्तायं नेतराविति निश्चयः ।
तन्निर्वर्त्यागामिमुखकर्मणां स्थितिरुच्यते ॥ ३९ ॥
देहारम्भात्परं पुंसा स्वाज्ञानावृतिमोहतः ।
यत्कृतं पुण्यपापादि तत्कर्मागामि भण्यते ॥ ४० ॥
आगामिकर्मप्रभवं देवतिर्यङ्नरादिषु ।
अनेकवारजनितं[3] कर्म संचितमुच्यते ॥ ४१ ॥
संचिते किंचिदादाय विधात्रा पुण्यपापयोः ।
फलभोगप्रदतया कृतमारब्धकर्म तत् ॥ ४२ ॥

[1] हित्वा B.   [2] कम् B.   [3] दं A.

प्रागेवारब्धरूपत्वादिदं प्रारब्धमीरितम् ।
आगामिसंचिताभ्यां तत् प्रबलं प्रवदन्ति हि ॥ ४३ ॥

तत् प्रारब्धं त्रिधा भिन्नं सुखदुःखादिभेदतः ।
मनसो ह्लादनकरं सुखं प्रारब्धमुच्यते ॥ ४४ ॥

मनसः खेदजनकं दुःखं प्रारब्धमुच्यते ।
मनःसुखासुखकरं मिश्रमित्यभिधीयते ॥ ४५ ॥

एतत् त्रयमपि त्रेधा भिद्यते व्यवहारतः ।
स्वेच्छानिच्छापरेच्छाभ्यस्तद्भेदोऽपि विविच्यते ॥ ४६ ॥

स्वेच्छयेदं करोमीति कृते तज्जसुखादिकम् ।
यल्लभेत् स[1] चिदाभासः स्वेच्छाप्रारब्धमेव तत् ॥ ४७ ॥

अनिच्छयागतं किंचिच्छीतवातनृपादिभिः ।
अप्रार्थितसुखाद्येवानिच्छाप्रारब्धमीरितम् ॥ ४८ ॥

परेण प्रेर्यमाणस्य यत्कर्तव्यं त्वयेति च ।
तेनात्तसुखदुःखादिपरेच्छारब्धमुच्यते ॥ ४९ ॥

नन्वारब्धेन देहः स्यात्तेन कर्मद्वयोद्भवः ।
पुनरारब्धतो देहस्तेन कर्मद्वयं[2] मिथः ॥ ५० ॥

कार्यकारणतामोहः[3] तयोर्वान्यतरस्य वा ।
[4]तयोरन्यस्य वा सम्यग्वक्तव्यमिति चेन्न तत् ॥ ५१ ॥

मूलाविद्याविकारत्वात्कार्यकारणसंततेः ।
कार्यकारणतामोहः कस्यापि न हि युज्यते ॥ ५२ ॥

[1] सच्चिदाभास A. [2] त्रयं A. [3] पूगः A.
[4] B omits five lines from this half.

अधिष्ठेयस्य मिथ्यात्वादधिष्ठानस्य सत्त्वतः ।
द्वयोरन्यस्य मृग्यत्वान्न स्यात्कार्यादिविभ्रमः ॥ ५३ ॥
नन्वविद्या कारणत्वं भजेत् कर्मशरीरयोः ।
कर्मदेहौ मिथः कार्यं भजेतामिति चेन्न तत् ॥ ५४ ॥
अविद्याविद्यमानत्वात् सा कथं कारणं भवेत् ।
तथाप्येकस्य कार्यत्वं कारणत्वं विरुध्यते ॥ ५५ ॥
बीजाङ्कुरादिदृष्टान्तं विना कर्मशरीरयोः ।
मिथः कारणता नैव तदेवास्त्विति चेन्न तत् ॥ ५६ ॥
साध्यतुल्योऽत्र दृष्टान्तः कथं साध्यं प्रसाधयेत् ।
ततोऽन्यस्यानुपालम्भात् कार्यादिर्नैव संभवेत् ॥ ५७ ॥
ननु तिष्ठतु किं तेन तादात्म्यं भ्रान्तिजादिकम् ।
दुस्त्यजं प्रत्यगद्वैतं ब्रह्म प्राप्य कदाचन ॥ ५८ ॥
जीवभावं परित्यज्य सच्चिदानन्दलक्षणम् ।
स्वस्वरूपं यथा पूर्वं न भजेदिति चेन्न तत् ॥ ५९ ॥
स्वाज्ञानोद्भूततादात्म्यत्रये स्वज्ञाननाशिते ।
त्यक्त्वारोपितजीवत्वं ब्रह्म ब्रह्म भवेन्न किम् ॥ ६० ॥
शास्त्रज्ञानाद् भ्रान्तिजन्यतादात्म्यं रज्जुबोधवत् ।
बीजकायस्य मिथ्यात्वात् तेन साकं निवर्तते ॥ ६१ ॥
लिङ्गदेहेन तादात्म्यं सहजं यद्यपि ध्रुवम् ।
[1]तदपीह भजेन्नाशं सम्यग्विज्ञानखड्गतः ॥ ६२ ॥
स्थूलदेहेन तादात्म्यं कर्मजं भोगमात्रतः ।
प्रारब्धकर्मणि क्षीणे नश्यत्येव न संशयः ॥ ६३ ॥

1 तदप्यथ B.

यद्वा [1]कर्मब्रह्मबोधाच्चरमात् सहजादिवत् ।
कर्मजं चापि तादात्म्यं नश्येत् ज्ञानं हि तादृशम् ॥ ६४ ॥
ननु ज्ञानोदयात्पूर्वमारब्धानां त्रिकर्मणाम् ।
निवृत्तिर्ज्ञानमात्रेण कथं स्यादिति चेन्न तत् ॥ ६५ ॥
कस्मात् कर्मत्रयं जातमिति पृष्टे त्वयोत्तरम् ।
स्वाज्ञानेनेति वक्तव्यं रज्ज्वज्ञानोत्थसर्पवत् ॥ ६६ ॥
स्वाज्ञानोत्थविमोहस्य स्वज्ञानात् प्रलये तव ।
को विवादो वद ज्ञानमशक्तमिति चेन्न तत् ॥ ६७ ॥
ब्रह्मवित् परमाप्नोति शोकं तरति चात्मवित् ।
ज्ञात्वा तं[2] मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ ६८ ॥
'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' ॥ ६९ ॥
'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' ॥ ७० ॥
श्रुतिस्मृतिशतेष्वेवं वर्तमानप्रयोगतः ।
ज्ञानात् कर्मक्षयान्मुक्तिसिद्धिः स्यादिति घोषितम् ॥ ७१ ॥
ब्रह्मासीति गुरुप्रोक्तशास्त्रविज्ञानमात्रतः ।
न श्लिष्यते मुनिर्भाविकर्मभिर्जन्महेतुभिः ॥ ७२ ॥
श्रुत्याचार्योक्तितोऽकर्म ब्रह्मास्मीत्यनुभूतितः ।
संचितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥ ७३ ॥
आगामिसंचिताभ्यां तत् प्रारब्धं बलवत्तरम् ।
अनुभूतिं विना नाशं कथं यातीति चेन्न तत् ॥ ७४ ॥

[1] कर्मप्रबोधाच्च A. [2] तत् B.

कर्मणा निर्मितो देहो नैवात्मा कर्मनिर्मितः ।
अकर्मात्माहमस्मीति स्थितस्यारब्धकर्म न ॥ ७५ ॥
आत्मनो मास्त्विदं कर्म देहस्यास्त्विति चेन्न तत् ।
देहस्त्वात्मापरिज्ञानात् कल्पितो रज्जुसर्पवत् ॥ ७६ ॥
[1]आत्मन्यध्यस्तदेहस्यासत्यत्वात्तस्य जन्म न ।
न ह्यजातस्य नाशोऽस्ति प्रारब्धमसतः कुतः ॥ ७७ ॥
ज्ञानेनाज्ञानतत्कार्यलये सति कथं मुनेः ।
देहस्तिष्ठेदिति जडान् वदतो बोधनाय हि ॥ ७८ ॥
तस्य तावदेव चिरमिति प्राह श्रुतिः स्वयम् ।
नैव देहादिसत्यत्वबोधनायाह सा श्रुतिः ॥ ७९ ॥
यत्र यत्र मनो देही धारयेत् सततं धिया ।
स्नेहाद् द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ॥ ८० ॥
तूलाविद्यातुरीयांशविद्याधिष्ठानरूपिणि ।
अकर्मप्रत्यगात्माहमिति साक्षात्कृते मुनेः ॥ ८१ ॥
स्वाज्ञानजातकर्मादिलये स्वज्ञानमात्रतः ।
तूलविद्या लयं याति मूलाविद्यापि नश्यति ॥ ८२ ॥
स्वाधिष्ठेयभिदालब्धतुर्यप्राज्ञादिविभ्रमः ।
साक्षीशसूत्रवैराजभेदेन सह नश्यति ॥ ८३ ॥
अविद्याकर्मणि क्षीणे निरधिष्ठानमद्वयम् ।
त्रिपान्नारायणाख्यं तदकर्म ब्रह्म शिष्यते ॥ ८४ ॥
नौस्तारयेत्सरित्पारं स्वारूढान् पारवर्जितम् ।
अविद्याकर्मजलधिं स्वद्रष्टॄनपि नौरियम् ॥ ८५ ॥

1 आत्मबुध्यस्त A.

नौकामिमां प्रपश्यन्तु चक्षुष्मन्तो मुमुक्षवः ।
तरन्तु कर्मजलधिं यान्तु विष्णोः परं पदम् ॥ ८६ ॥

वासुदेवेन्द्रचिच्छिष्यरामचन्द्रेन्द्रयोगिना ।
कर्माकर्मविवेकोऽयं कृतो हरिपदाप्तये ॥ ८७ ॥

रामचन्द्रार्पणमस्तु